# भर्तृहरेः शब्दब्रह्मप्राप्तिविकल्पविमर्शः

डॉ. सदानन्दत्रिपाठी
शासकीयः संस्कृत महाविद्यालयः
उज्जयिनी -म.प्र.

**अवन्तिकापुरीशाय निःशेषक्लेशनाशिने ।**
**ज्योतिलिङ्गस्वरूपाय महाकालाय ते नमाः।**
- ('दयालू' पाह्वस्य सदानन्दत्रिपाठिनः)

मैत्रायण्युपनिषदनुसारं द्वे ब्रह्मणी ज्ञातव्ये विद्येते, एकं शब्दब्रह्म, द्वितीयन्तु परब्रह्म । शब्दब्रह्म विज्ञाय जनः परब्रह्म समधिगच्छति ।

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।।**[1]

कृष्णद्वैपायनेन भगवता बादरायणेनापि द्वयोः पद्ययोरेतस्यैव समुल्लेखो विहितः

**श्रीमन्महाभारते -** **वेदाः प्रमाणं लोकानां न वेदाः पृष्ठतः कृताः ।**
**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।**
**शरीरमेतत् कुरूते यदवेद कुरूते तनुम् ।।**[2]

'निगमकल्पतरोर्गलितं फलम्' इत्याख्ये, सर्ववेदान्तसिद्धान्तसारसर्वस्वे श्रीमद् भागवतमहापुराणे शब्दब्रह्मणि पर ब्रह्मणि च सर्वात्मना निष्णातस्य तत्वविदः प्रशंसन् महिमानं च वर्णयन्नाह प्रबुद्धा नाम योगीश्वरो निमिंनामराजानम्

**तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।**
**शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ।।**[3]

सुविदितमेवास्ति समेषां यत् पुरा सकलन्यायबीजगर्भितः सङ्ग्रहनामा लक्षश्लोकात्मको दर्शनग्रन्थो महामुनिव्याडिनिर्मित आसीत् । कियता कालेन नष्टे सति तस्मिन् सङ्ग्रहे व्याकरणस्य विलुप्तप्रायं दर्शनत्वं पुनर्भगवान् पतञ्जलिरुज्जीवयामास महाभाष्यरचनया। पुनस्तच्छिष्यपरम्परया आवन्तिकमहावैया करणाद्वैतदार्शनिकश्रीभर्तृहरिप्रणीत**वाक्यपदीय**ग्रन्थरत्नरचनया च तद्व्याक रणदर्शनं भृशं बर्धितं पोषितश्चाभवत्।

**'वागेव विश्वा भुवनानि जज्ञे'** इत्यादिभिः श्रुतिवाक्यैः प्रमाणितं वाग्-रूपिशब्दत्तत्वमेवास्ति ब्रह्म । इदमेव शब्दब्रह्मवाक्यपदीय-ब्रह्मकाण्डस्य प्रधान-प्रतिपाद्यविषयो वरीवर्ति । एतत्तु लक्ष्यीकृत्यैव आचार्यभर्त्तृहरिः स्वीयग्रन्थस्य समारम्भे सर्वप्रथमं वस्तुनिर्देशात्मकमङ्गलाचरणमाध्यमेन मङ्गलस्वरूपं शब्दब्रह्म संस्मृतवान् । यच्छब्दतत्त्वं उत्पत्तिविनाशरहितं, विकारहीनं व्यापकश्च विद्यते, तथा येन निखिलजगतः समस्तक्रियाकलापः सञ्चालितो भवति, तदेव शब्दतत्त्वात्मकम् अक्षरं ब्रह्म अर्थरूपे विवर्तितो भवति, —

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।**[४]

पूर्वोक्तस्य शब्दब्रह्मणः प्राप्त्युपायोऽनुकारः (प्रतिमा) च वेदः । इति विनिर्दिशति वाक्यपदीयकारः कारिकायाम् —

**प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।**
**एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक्पृथक् ।।**[५]

कारिकायामस्यां यथा शब्दब्रह्मणः प्राप्तेरूपायो ब्रह्मराशिः वेद अनेकवर्त्मा कथितस्तथैव भर्तृहरिणा अस्याः कारिकायाष्टीकां प्रकुर्वन् स्वोपज्ञहरिवृत्तौ शब्दब्रह्मणः प्राप्तिविकल्पाः अष्टौ नव वा विनिर्दिष्टाः । एते प्राप्तिविकल्पा एवास्मदीयशोधालेखस्य प्रतिपाद्यविषयः । प्रकृतमनुसरामस्तावत्प्रथमं समुपस्थाप्यते प्रमाणार्थं भर्तृहरिकृता **हरिवृत्तिः**- 'ममाहमित्यहङ्कारग्रन्थिसमतिक्रममांत्रं ब्रह्मणः प्राप्तिः। विकाराणां प्रकृतिभावापत्तिरि त्यपरे । वैकरण्यम् असाधना, परितृप्तिः, आत्मतत्त्वम् आत्मकामत्वम्, अनागन्तुकार्थत्वम् परिपूर्ण-शक्तितत्वम्, कालवृत्तीनामात्ममात्रास्वसमावेशः, सर्वात्मनानैरात्म्यम् इतिप्राप्तिविकल्पाः ।[६]

ममाहश्चैवं विद्यस्य यो भेदवादिसङ्कुचिताहङ्कारस्यस्त्रिग्रन्थिः, तस्योन्मोचनमेव ब्रह्मणः प्रप्तिरित्येकं मतम् । वाक्यपदीयस्य टीकाकारस्य श्रीवृषभाचार्यस्याभिमतमस्ति यद् ह्यचेतनस्य ममाहंरूपाहङ्कारग्रन्थे-विवर्त्तनं भवति, तदा अहम्प्रत्ययो जायते । ततः परमेवं विद्यस्य ज्ञानानन्तरं 'मम' प्रत्ययः समुद्भवति, तथा द्वाभ्यामाभ्यां प्रत्ययाभ्यां संसारस्य उत्पत्तिर्भवति । अग्रे स आह - 'मौलस्य हेतोरहङ्कारस्य यः समतिक्रमः अतिवृत्तिः सा ब्रह्मणः प्राप्तिः। **'मौलहेत्वहङ्कारस्यातिक्रमणं ब्रह्मणः प्राप्तिरिति'।**[७] मौलहेत्वहङ्गरविषये के नाम मौलाः । इत्यत्र परिभाषयति

**विज्ञानेश्वरः -**

**ये तत्र पूर्वं सामन्ताः पश्चाद् देशान्तरं गताः ।**
**तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्तिताः ।।**[८]

मूलप्रकृतौ स्थित्वा पुनः जीवेषु प्रविश्य तेषां बन्धनकारणं सिद्धयति, अत एव अहङ्कारो मौलहेतुरित्युच्यते । मूलप्रकृतिजन्यो हेतुभूतो यदहङ्कारो अस्मिता वा विद्यते, स एव दृक्शक्ति-पुरुषस्य दर्शनशक्तिव्यष्टिप्रकृतेश्चैकाकारतारूपो ग्रन्थिः। ग्रन्थेरस्योन्मोचनं मोक्ष इत्यभिधीयते । यथोक्तम् **'दृग्दर्शनशक्त्योरेकात्मतेवास्मिता'**।[९] अहङ्कारस्य चिदात्मनश्च तादात्म्याध्यासो ग्रन्थिरिति नाम्ना सम्बोध्यते । कामाः इच्छाः वा ग्रन्थिस्वरूपाः । **'कामा ग्रन्थिस्वरूपेण व्याख्याता वाक्यशेषतः '।**[१०]

मुमुक्षोर्हृदये विद्यमानास्तादात्म्याध्यासमूलका ये कामा इच्छाः वा वर्तन्ते, तत्वज्ञानेनाध्यसस्य निवृत्या यदा तेषां तासां वा निवर्तनं जायते तदा मर्त्योऽमृतो भूत्वा ब्रह्मत्वमवाप्नोति । वक्तीत्येवं भगवती श्रुतिः,- **'अथ मर्त्योऽमृतो भुवति, अत्र ब्रह्म समश्नुते '।**

हरिवृत्तिगतमात्रशब्दस्य तात्पर्यमिदमस्ति-यदा योगी चिदात्मानम् अहङ्काराद् विविक्तीकरोति, तस्यां दशायाम् अहङ्कारं स्वस्मात् पृथगवलोकयन् कोटिकोटिवस्तुनामिच्छां कुर्वन्नपि ग्रन्थिभेदनकारणात् तैस्तैर्न बाध्यते । एतद्विषये परामृशति श्रीविद्यारण्यस्वामिमहाभागः -

**अप्रवेश्य चिदात्मानं पृथक् पश्यन्नहङ्कृतिम् ।**
**इच्छेस्तु कोटिवस्तुनि न बाधो ग्रन्थिभेदतः ।।**[११]

मात्रग्रहणस्य तात्पर्यमस्ति- तद्भिन्नमात्राणां-विषयाणाम् अनिवृत्रावपि अहङ्कारग्रन्थिमात्राद् रहितायान्दशायां मुमुक्षुजनाः मुक्ता एव । अत्र विषये श्रीवृषभाचार्येणाप्युक्तमस्ति- **'मात्रग्रहणं तदन्यमात्राणामप्यनिवृत्तावपि येन विरहिता मुक्ताः'** ।[१२]

रूपादिकविकारकार्य्याणा स्वकारणप्रकृतौ लयनमेव ब्रह्मप्राप्तिः । भेदानामनुकरणस्य निवृत्तेरनन्तरम् एकम् अभिन्नं ब्रह्मैवावशिष्यते । अतस्तत्स्वरूपे योगी वर्तमानो भवति । इतः पूर्वोक्ते विकल्पे मात्रासु सत्स्वपि मुक्ति र्भवतीति वैशिष्ट्यमेतद् ।

**वैकरण्यम् - 'प्राप्त्युपायोऽनुकारश्च०'** अस्याः कारिकायाः 'हरिवृत्तौ' वैकरण्यम् इति शब्दः प्रयुक्तो वर्तते, यो हि मुक्तेः प्रकारवाचाकः । श्रीवृषभाचार्य्यो बुद्धीन्द्रियस्य कर्मेन्द्रियस्य च निवृत्तिरूपोऽर्थः स्वीकुर्वन् कथयति,-**'करणनिवृत्तौ संसारनिवृत्तिः।'** कारिकामिमां व्याख्याय लिखति पं. श्रीरघुनाथशर्म्ममहाभागो यदेषा मुक्तिर्योगानुसारी ।

वैकरण्यं नाम बाह्याभ्यन्तरकरणानां यत्नपूर्वकं निरोधाभ्यासेन परिपक्वेन स्वभावतो विषयेभ्यो निवृत्तिरेव, तदेव ब्रह्मप्राप्तिरिति योगानुसारिणः ।'[१३]

शरीरेन्द्रिययोः सत्वेऽपिनिरतिशयैश्वर्यस्योपलब्धिः वैकरण्यम् इति कथनमस्ति भासर्वज्ञस्य- **'सम्भृतकायेन्द्रियस्यापि निरतिशयैश्वर्यसम्बन्धित्वं वैकरण्यम् इति ।'**[१४]

एतदतिरिक्तं पाशुपतसूत्रे सूत्रितम् अस्ति-'विकिरणः' (वैकरण्यम्)।[१५] अत्र भाष्यं प्रकुर्वन्नाह कौण्डिन्यः -**'विशिष्टत्वाद् ग्राहकत्वात् सूक्ष्मत्वाच्च करणानाम् । तस्मादिवकरणं इति कैवल्यम् ।'**[१६]

काश्मीरशैवदार्शनिकोऽभिनवगुप्तपादाचार्य्योऽत्रब्रूते- 'तेषूमापतिरेव प्रभुः स्वतन्त्रेन्द्रियो विकरणात्मा।'[१७] प्रख्यातविदुषा जयरथेनास्य विशदा टीका कृता ।

कविकुलगुरुर्महाकविकालिदासेनापि 'करणविगमात्' पदप्रयोगो विहितः ।[१८]

एवमेव महाकविशूद्रकोऽपि 'व्यपगतकरणम्' इति पदं प्रयुङ्क्ते ।[१९] सारतथ्यरूपेण कथितुं शक्यते यच्चक्षुरादिपञ्चज्ञानेन्द्रियाणां, हस्तपादादिपञ्चकर्म्मेन्द्रियाणां बुद्धेर्मनसश्चैषां समेषां निवृत्तिरेव वैकरण्यम् इति । यतो हि जगतः परिज्ञानमिन्द्रियैरेव सम्भवति । इन्द्रियाणां निवृत्यैवास्य संसारस्य सर्वथा निवृत्तिर्मन्यते ।

**असाधना** — श्रीवृषभाचार्य्यमते- असाधनायाः अर्थ अबहिः साधना विद्यते । बाह्यसंसारे त्वनुकूलविषयाणां साधनाऽपि विधीयते । ततोऽपि तृप्तिर्जायते । परन्त्वन्तः साधनायाः एवाधिकं महत्त्वं निश्चीयते । अबहिः साधना अर्थात् बाह्यसाधनानामनुपलब्धतायामपि तृप्तिः, सुखम् आनन्दश्चोपलभ्यन्ते ।

अस्मन्मते तु बहिः साधना अन्तःसाधनाचोभे श्रीविद्यार्चन-परम्परायाः बहिर्यागोऽन्तर्याश्च भेदतो द्वौ साधनोपासनाप्रकारौ स्तः। एतद्विषये श्रीसद्गुरु-श्रीविद्यादीक्षितोपासनासम्प्रदायपरम्परा समाश्रयणीया।

**परितृप्तिः-** सा तृप्तिर्यत्र न काऽपीच्छाऽवशिष्यते । साधकस्य हृदये यदा जपाद्यनुष्ठानोपसनादिभिर्नवनवोन्मेषशालिनी प्रज्ञात्मिका प्रतिभा समुद् भवति समुल्लसति, तदा विषयभोगसाधनानाम् आस्वादं विना शाश्वती परमा तृप्तिः समुपलभ्यते । सैषा ब्रह्मप्राप्तिरिति निश्चप्रचम्। प्रकाशस्वरूपस्य स्फोटरूपस्य वा शब्दब्रह्मणो महिमा तदा सुतरां नैकट्येनानुभूयते । वाक्यपदीयटीकाकारो हेत्नाराजो विवृणोति तृप्तिमिमाम्आत्मकथ्यपुरस्सरम्:-

**'तृप्तिं यत्परमां तनोति विषयास्वादं विना शाश्वतीम् ।'**[२०]

अत्रावद्येयमस्तियत् केचन विद्वांस असाधनां परितृप्तिश्च पृथक् पृथङ्मत्वा व्याख्यायन्ते ।

**आत्मतत्त्वम् -** आत्मतत्त्वं नाम आत्मरूपतायाः समुपलब्धिरिति । 'आत्मतत्त्वम्' इत्यस्य नामोल्लेखः शुक्लयजुर्वेदीये मण्डल् ब्राह्मणोयनिषदि प्राप्यते । तत्र तु कथा वर्त्तते यदेकदा याज्ञवल्क्यो महामुनिः आदित्यलोकं गत्वा, भगवन्तमादित्यं नमस्कृत्योवाच- भो भगवन्नादित्य । मह्यम् आत्मतत्त्वम् अनुब्रूहीति । सर्वेश्वरः श्रीमन्नारायणस्ततस्तस्मै पञ्चब्राह्मणेषु विभक्तोपनिषदि यमाद्यष्टाङ्गयोगादिपुरस्सरम् आत्मतत्त्वम् उपादिशत् । तद्यथा-

ॐ याज्ञवल्क्यो ह वै महामुनिरादित्यलो कं जगाम । तमादित्यं नत्वा भो भगवन्ना दित्यात्मतत्त्वमनु ब्रूहीति । स होवाच नारायणः ।[२१]

एवमेव दशलक्षणात्मिका ब्रह्मविद्याकरग्रन्थरत्ने शुकशीस्त्रे श्रीमद्भागवतमहापुराणेऽपि नामते आत्मतत्त्वं व्याख्यातः स्मृत्तस्वः-

**''तस्मिन् विशुद्धउपलभ्यत आत्मतत्त्वं**
**साक्षाद् यथामल दृशोः सवितृप्रकाशः ।।''**[२२]

यत्र ब्राह्यपरिस्थितिः सर्वथा तिरो हिता भवति । साद्यकस्तुकेवलम् आत्मानुभूतौ तल्लोनो

भवति, तन्नाम आत्मतत्त्वम् ।

श्रीवृषभाचार्य्यः प्रस्तुते सन्दर्भेऽमोद्घरती उपनिषत्वाक्यम् । तद यथा प्रियया स्त्रिया सम्पपरिष्वक्तो बाह्यं किञ्चन वेद नान्तरम्. [२३]

वस्तुस्त्वत्र बृहदारण्यकोपनिषदि सुषुप्तिदशायाः वर्णनं प्राप्त मस्ति। यथा स्वप्रियया स्त्रिया समालिङ्गितः पुरुषः स्वस्वाद बहिः मद्भिन्नस्ति किमपि वस्तु इत्येवं न जानाति । आत्मन आभ्यन्तर मेवायम् अहमस्मि सुखी दुःखी वा एवं विधं जानाति । अनुभवति च । आलिङ्गनावसरे सः पुरुषः एकाकारत्वान्न किमपि जानाति । एवमेव, सुषुप्ति दशायां जीवोऽयं स्वस्वभाविके परमार्थस्वरूपे ज्योतिः प्राज्ञेन सम्परिष्वक्तो भूत्वा बाह्याभ्यन्तरपदार्थान्

नहि जानाति, एतदेवास्य आप्तकामता, अकमता, शोकशून्यता चास्ति।

प्रश्नोऽयं समुदेति यदेषा तु मुक्तिदशा नास्ति, तर्हि कथं श्रीवृषभाचार्यः स्वव्याख्यां दृष्टान्तोऽयं समुपस्थापित तत्रायं समादधाति-वस्तुतस्तु भगवत्पादाद्यशङ्कराचार्य्य महाभागाः मुक्तिदशायाः प्रत्यक्षनिर्देशाय दृष्टान्तोयमुपनिषदि निरूपयन्ति एवमाह-इदानी योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यम् स प्रत्यक्षतो निर्दिश्यते, यत्राविद्याकामकर्म्माणि न सन्ति। तदेतत् प्रस्तुतम्-यत्र एषा सुषुप्तिदशा मुक्तिंदशायाः निदर्शिकामात्रम् अस्ति ।

आत्मकामत्वम् (आप्तकामत्वम्)-रूप, रसादीनां विषयभोगानां कामनानामभावः केवलमात्मनः परमात्मनः सर्वात्मना कामनैव आत्मकामत्वम् इति । आत्मतत्वात्कामत्वयोः भेदोऽयं वर्तते यदात्वमतत्वे आत्मनुभवतेर्गाम्भीर्य विद्यातते, किन्त्वात्मकामत्वे बाह्यनश्वरक्षणभङ्गुर विषयभोगेष्वनासक्तिःपरिलक्ष्यते। आत्मस्वरूपस्य उपलब्धेरनन्तरमात्मकामत्वम् अथवा आप्तकामत्वं स्वयमेव समायाति। मुक्तिदशायाद्वैतता सर्वैक-तावा सम्पद्यते, तदा आत्मा स्वस्मादतिरिक्तानां शब्दादिकानां तन्मात्राणामभावत्वात् तासां का कामना विधास्यति, अतो विषयान् प्रति तस्यौत्सुक्यं विगमनं सुतरां तु संसिद्धमस्ति । विषयेऽत्र भगवतत्पादाद्यशङ्कराचार्यः प्राह-

यस्मादेवं सर्वैकत्वमेवास्य रूपमतस्तदवा अस्यात्मनः स्वयञ्ज्योतिः स्वभावस्यैतद् रूपमाप्तकामम्।

यस्मात् समस्तमेतत् तस्मादाप्ताः कामाः अस्मिन् रूपे तदिदमाप्तकामम् ।[२५]

मुत्त्यवस्थायांमात्मा स्वयंज्योतिः स्वरूपः समस्तो भवति। अतएवं समस्तकामाः प्राप्ताः भवन्तिः। अनेन सुस्पष्टं प्रतीयते यदात्मकामता आप्तकामतावाऽऽत्मरूपतातो व्यतिरिक्ता नहि ।

आत्मकाम इति वेदान्त दर्शनशास्त्रीयः पारिभाषिकः शब्दः । अस्य प्रयोगप्राप्तिरूपनिषत्सु प्रायशः । निदर्शनरूपे णैतस्योदाहरणेद्वे प्रस्तूयेते ।

महत्वपदं ज्ञात्वा वृक्षमूले वसेत कुचेलोऽसहाय एकाकी समाधिस्थ आत्मकाम आप्तकामो निष्कामो जीर्णकामो हस्तिनि सिंहे दंशे मशके नकुले सर्प राक्षसगन्धर्वे मृत्यो रूपाणि विदित्वान बिभेति कुतश्चनेति.

अन्यच्च-अस्यैतदाप्तकाममात्काममकाम रूप शोकान्तरम् अनागन्तुकार्थत्वम् -आगन्तुकेषु आगमापायिषु परिवर्तनशीलेषु भोगेषु तितिक्षत्वम् अनागन्तुकार्थत्वम् इति । यतो हि श्रीमद्भगवताश्रीकृष्णेन संस्पर्शजाः भोगा दुःखयोनयः मात्रास्पर्शाः शीतोष्णसुखदुःखदाः अनित्या आगमापायिनश्चोत्पत्तिविनाशशीलाः प्रोक्ताः। तान् प्रति तितिक्षा साधनीया ।

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुः खदाः.**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्वभारत ।।**[२८]

मुक्तिदशायां स्वयञ्ज्योतिरात्मनोऽसङ्गत्वातत्राविद्याकामकर्मप्रभृतीनि न तिष्ठन्ति ।यतो हयेते आगन्तुकाः। अतस्तस्यामवस्थायां मात्मन अनागन्तुकार्थत्वं सुस्पष्टमित्याहाद्यशङ्कराचार्यभगवत्वपाद :-

प्रकृतःस्वयञ्ज्योतिरात्मा अविद्याकामकर्मविनिर्मक्त इत्युक्तम् असङ्गत्वादात्मनः आगन्तुकत्वाच्चतेषाम्।

अन्नागन्तुकार्थत्वस्य व्याख्यां कुर्वन् श्रीवृषभाचार्यो विवेचयति यत् भिन्न भिन्न विषयाणां कामनाकरणम् आगन्तुकार्थत्वमृष एतदिवपरीतश्चागन्तु कार्थत्वम् इति । प्रकृति पुरुषान्यताख्यातरेनन्तरं भोक्त व्यविषयेभ्यो मुक्ते सति । पुरुषः पुनर्भोगान् नेच्छति । अनेन प्रतीयते यच्छ्रीवृषभाचार्यो

विशेषरूपेण साङ्ख्यवादं प्रति दृढनिष्ठावान् ।

परिपूर्णशक्तित्वम्-सर्वथा साम्र्थ्यवत्तेति परिपूर्णशक्तित्वं व्यञ्जयति । परिपूर्णशक्तित्वमपि चात्मरूपातायाः अन्तर्गतमेव गण्यते । ईशित्व-वशित्वाष्टैश्वर्ययोगोपलब्धिभ्य आत्मानं मुक्तं मन्येच्चेतर्हि परिपूर्णशक्तित्वं सङ्गच्छेदिति ।

## कालवृत्तीनामात्ममात्रास्वसमावेशः

जन्म, विपरिणामादयो विकाराः कालवृत्ते स्वरूपास्सन्ति। कालवृत्तेः धर्माणाम् आत्मवृत्ते पृथक परिज्ञानं कालवृत्तीनात्मात्रास्वसमावेशः कथ्यते । प्रतिबन्धकानुज्ञात्मकयोः कालस्य द्वयोर्वृत्योःपरमात्मनो विवर्तरूपमात्राभिः कारणशक्तिभिस्सह सम्बन्धो न भवेत्तर्हि मुक्तिः सिद्धा । श्रीवृषभाचार्योऽत्र तदा मुक्त इत्युच्यते ।समावेशस्तदनुग्रहः। आत्ममात्रासु-परमात्मनो याः मात्राः कर्मात्मरूपाः तासु । ते हि कर्मात्मानः कालेनानुगृहीताः प्रतिबन्धाभ्यनुज्ञाभ्यां प्रवर्तन्ते ।

भावार्थोऽयमस्ति यत् परमात्मनो मात्रास्सन्ति । कर्मात्मास्वरूपोजीवश्चेदासु मात्रासु कालव्यापार प्रवृत्तो न भवेत्तर्हि मोक्ष एवास्ति ।

सर्वात्मनानैरात्म्यम्-सर्वात्मिना नैरात्म्यम् अर्थात ब्रह्मणः स्वभावस्यनिरूपणम् अशक्यम् । अतो नैःस्वाभावाव्यस्याथवा नैरात्म्यस्य प्राप्तिरेव मुक्तिः वस्तुतस्तु ब्रह्मणः संवर्तरूपो वाण्याः विषयो नैवास्ति। ब्रह्माणि तत्वेवारूपस्याभावत्वात् तत्तु सर्वात्मना नैरात्म्यरूपेण द्रष्टु शक्यते ।

अत्रावधयेमस्ति यद् ये विद्वांसः इमं सिद्धान्तं माध्यमिकानां बौद्धानां मन्यन्ते तैरिदंमवश्यमेव सम्यक्तया विचारणीयं यदत्र वेदानुसारं ब्रह्माणः प्राप्तेः विचारः क्रियते, न तु निर्वाणस्तु । बौद्धानां मते तु आत्मनो निर्वापः सर्वथाऽभावः स्वीकृतो विद्यते ।

सम्भवतः पाठभेदात् केचन विद्वांसो ब्रह्मप्राप्तिविकल्पमिमं सर्वथा नैराश्य' मिति कृत्वाऽस्यव्याख्या सर्वथा निरीहत्वम् इति कुर्वन्ति । तेषां मान्यता विद्यते -'नैरश्यं परमं सुखम्' ।।

एते ब्रह्मप्राप्तिविकल्पाः मतान्तराणिवासन्ति । श्रीवृषभोऽमङ्केतयति-'प्राप्तिविकल्पाः प्राप्तिविकाराः।३१

इमे ब्रह्मप्राप्तिविकल्पभेदाः परस्परं भिन्नः न सन्ति कथमपि, अपि तु सर्वे सर्वथैकत्र परस्परं सम्पृक्ताः ओतप्रोतास्सन्ति । ध्यातव्यमिदमस्ति यद्वेदस्यप्रसंङ्गे प्राप्तिशब्दस्य यः पारिभाषिकोऽर्थः मीमांसादर्शने सङ्गृहीतो विद्यते तदतिरिक्तम् अर्थोऽत्र भगवता भर्तृहरिणा गृहितो वर्तत इति ।

१. मैत्रायणी-उपनिषद प्रपाठकः दृ कण्डिकारर
२. महाभारतम् शान्तिपर्वे, अध्यायः २७०/१-२
३. श्रीमद्भागवतंमहापुराणम्, स्कन्धः११/अध्यायः३/२१
४. वाक्यपदीयम् ,ब्रह्मकाण्डम् कारिका ?
५. वाक्यपीदयम्, ब्रह्मकाण्डम्, कारिका ५
६. वाक्यपदीयम् , ब्रह्मकाण्डम् कारिका ५ हरिवृत्तिः
७. वाक्यपदीयम् , ब्रह्मकाण्डम् , कारिका ५, श्रीवृषभदेवटीका, लाहौरसंस्करणम्
८. श्रीविज्ञानेश्वरप्रणीता 'मिताक्षरा'व्याख्या याज्ञवल्क्यस्मृतौ
९. पातग्जलयोगसूत्रम् २पादः/सूत्रम् ६
१०. पञ्चदशी, चित्रदीपप्रकरणम् ६ /श्लोकः २६०
११. पञ्चदशी, चित्रदीपप्रकरणम् ६/श्लोकः २६२
१२. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिकापू , श्रीवृषभाचार्यकृताटीका, लाहौरसंस्करणम
१३. वाक्यपदीयम् अम्बाकर्त्रीटिका
१४. भासर्वज्ञकृता गणकारिकायाः रत्नटीका
१५. पाशुपतसूत्रम् अध्याय १/२५ सूत्रम्
१६. तेदव, कौण्डिन्यकृतपञ्चार्थभाष्यम्
१७. तन्त्रालोकः (जयरथकृताटीका)
१८. मेघदूतम्
१९. मृच्छकटिकम्
२०. वाक्यपदीयम्, तृतीयकाण्डस्य व्याख्यायाः मङ्गलाचारणे हेलाराजः
२१. शुक्लयजुर्वेदीया मण्डलब्राह्मणोपनिषद् प्रथमं ब्राह्मणं, प्रथमोऽ नुवाकः
२२. श्रीमद्भागवतमहापुराणम् ११.३. ४० उत्तरार्द्धम्
२३. शु. यजुर्वेदीया बृहदारण्यकोपनिषद् अध्यायः ४/ज्योतिर्ब्राह्मणं३/ मन्त्रः२१,(गीता प्रेस , गोरखपुर संस्करणम् ।)
२४. बृहदारण्यकोपनिषद् ४.३.२१ शाङ्करभाष्यम्
२५. बृहदारण्यकोपनिषद ४.३२१ शाङ्करभाष्यम्
२६. सुबालोपनिषद, त्रयोदशः १३ खण्ड
२७ बृहदारण्यकोपनिषद् ४.३.२१, पृष्ठ ९६८, गीताप्रेस गोरखपुरसंस्करणम्
२८. श्रीमदभगवद्गीता, अध्यायः २.१४ शाङ्करभाष्यम् ।
२९. बृहदारण्यकोनिषद , ४.३.२१ शाङ्करभाष्यम् ।
३०. वाक्यपदीयम् १.५ श्रीवृषभटीका
३१. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिकापञ्चमी, श्रीवृषभटीका ।